

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## षष्ठकाण्डे षष्ठः प्रश्नः

### सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्दाक्षिणानि द्वाभ्याङ्गार्हपत्ये जुहोति द्विपाद्यजमानः
प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमते सदोऽभ्यैति सुवर्गमेवैनँल्लोकङ्गमयति सौरी-
भ्यामृग्भ्याङ्गार्हपत्ये जुहोत्यमुमेवैनँल्लोकꣳ समारोहयति नयवत्यर्चाऽऽग्नीध्रे जुहोति सुवर्गस्य
लोकस्याभिनीत्यै दिवङ्गच्छ सुवः पतेति हिरण्यꣳ ॥ [१] ॥ हुत्वोद्गृह्णाति सुवर्गमेवैनँल्लोकङ्ग-
मयति रूपेण वो रूपमभ्यैमीत्याह रूपेण ह्यासाꣳ रूपमभ्यैति यद्धिरण्येन तुथो वो विश्ववेदा
वि भजत्वित्याह तुथो ह स्म वै विश्ववेदा देवानान्दक्षिणा वि भजति तेनैवैना वि भजत्येतत्
ते अग्ने राध ॥ [२] ॥ ऐति सोमच्युतमित्याह सोमच्युतꣳ ह्यस्य राध ऐति तन्मित्रस्य पथा
नयेत्याह शान्त्या ऋतस्य पथा प्रेत चन्द्र दक्षिणा इत्याह सत्यँवा ऋतꣳ सत्येनैवैना ऋतेन
वि भजति यज्ञस्य पथा सुविता नयन्तीरित्याह यज्ञस्य ह्येताः पथा यन्ति यद्दक्षिणा ब्राह्मणमद्य
राध्यास ॥ [३] ॥ मृषिमार्षेयमित्याहैष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान् तस्मादेवमाह
वि सुवः पश्य व्यन्तरिक्षमित्याह सुवर्गमेवैनँल्लोकङ्गमयति यतस्व सदस्यैरित्याह मित्रत्वाया-
स्मद्दात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा विशतेत्याह वयमिह प्रदातारः स्मोऽस्मानमुत्र
मधुमतीरा विशतेति ॥ [४] ॥ वावैतदाह हिरण्यन्ददाति ज्योतिर् वै हिरण्यञ्ज्योतिरेव पुर-
स्ताद्धत्ते सुवर्गस्य लोकस्या नुख्यात्या अग्नीधे ददात्यग्निमुखानेवर्तून् प्रीणाति ब्रह्मणे ददाति

प्रसूत्यै होत्रे ददात्यात्मा वा एष यज्ञस्य यद्धोताऽऽत्मानमेव यज्ञस्य दक्षिणाभिः समर्द्धयति ॥ [५] ॥

(हिरण्यꣳ राधौ राद्ध्यास ममुत्र मधुमतीरा विशतेत्य ष्टात्रिꣳशच्च) ॥ १ ॥

समिष्टयजूꣳषि जुहोति यज्ञस्य समिष्ट्यै यद्वै यज्ञस्य क्रूरय्यँद्विलिष्टय्यँदत्येति यन्नात्येति यदतिकरोति यन्नापि करोति तदेव तैः प्रीणाति नव जुहोति नव वै पुरुषे प्राणाः पुरुषेण यज्ञः सम्मितो यावानेव यज्ञस्तम्प्रीणाति षड् ऋग्मियाणि जुहोति षड्वा ऋतव ऋतूनेव प्रीणाति त्रीणि यजूꣳषि ॥ [६] ॥ त्रय इमे लोका इमानेव लोकान् प्रीणाति यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छेत्याह यज्ञपतिमेवैनङ्गमयति स्वाय्यँोनिङ्गच्छेत्याह स्वामेवैनय्यँोनिङ्गमयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर इत्याह यजमान एव वीर्यन्दधाति वासिष्ठो ह सात्यहव्यो देवभागम्पप्रच्छ यथ् सृञ्जयान् बहुयाजिनोऽयीयजो यज्ञे ॥ [७] ॥ यज्ञम्प्रत्यतिष्ठिपा(३) यज्ञपता(३)विति स होवाच यज्ञपताविति सत्याद्वै सृञ्जयाः परा बभूवुरिति होवाच यज्ञे वाव यज्ञः प्रतिष्ठाप्य आसीद्यजमानस्यापराभावायेति देवा गातुविदो गातुव्वित्त्वा गातुमितेत्याह यज्ञ एव यज्ञम्प्रति ष्ठापयति यजमानस्यापराभावाय ॥ [८] ॥

(यजूꣳषियज्ञेकचत्वारिꣳशच्च) ॥ २ ॥

अवभृथयजूꣳषि जुहोति यदेवार्वाचीनमेकहायनादेनः करोति तदेव तैरव यजते ऽपोऽवभृथमवैत्यफ्सु वै वरुणः साक्षादेव वरुणमव यजते वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति साम्नां प्रस्तोताऽन्ववैति साम वै रक्षोहा रक्षसामपहत्यै त्रिर् निधनमुपैति त्रय इमे लोका एभ्य एव लोकेभ्यो रक्षाꣳसि ॥ [९] ॥ स्यप हन्ति पुरुषःपुरुषो निधनमुपैति पुरुषःपुरुषो हि रक्षस्वी रक्षसामपहत्या उरुꣳ हि राजा वरुणश्चकारेत्याह प्रतिष्ठित्यै शतन्ते राजन् भिषजः सहस्रमित्याह भेषजमेवास्मै करोत्यभिष्ठितो वरुणस्य पाश इत्याह वरुणपाशमेवाभि तिष्ठति बर्हिरभि जुहोत्याहुतीनाम्प्रतिष्ठित्या अथो अग्निवत्येव जुहोत्यपबर्हिषः

प्रयाजान् ॥ [१०] ॥ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चत्याज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेति वरुणय्ँयजति वरुणपाशादेवैनम्मुञ्चत्यग्नीवरुणौ यजति साक्षादेवैनव्ँवरुणपाशान् मुञ्चत्यपबर्हिषावनूयाजौ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चति चतुरः प्रयाजान्यजति द्वावनूयाजौ षट्थ् सम्पद्यन्ते षड्वा ऋतव ॥ [११] ॥ ऋतुष्वेव प्रति तिष्ठत्यवभृथ निचङ्कुणेत्याह यथोदितमेव वरुणमव यजते समुद्रे ते हृदय मफ्स्वन्तरित्याह समुद्रे ह्यन्तर् वरुणः सन्त्वा विशन्त्वोषधीरुताऽऽप इत्याहाद्भिरेवैनमोषधीभिः सम्यञ्चन्दधाति देवीराप एष वो गर्भ इत्याह यथायजुरेवैतत् पशवो वै ॥ [१२] ॥ सोमो यद्बिन्दूनाम्भक्षयेत् पशुमान्थ्स्याद्वरुणस्त्वेनङ्गृह्णीयाद्यन्न भक्षयेदपशुः स्यान्नैनव्ँवरुणो गृह्णीयादुपस्पृश्यमेव पशुमान् भवति नैनव्ँवरुणो गृह्णाति प्रतियुतो वरुणस्य पाश इत्याह वरुणपाशादेव निर् मुच्यतेऽप्रतीक्षमा यन्ति वरुणस्यान्तर्हित्या एधोऽस्येधिषीमहीत्याह समिधैवाग्निन्नमस्यन्त उपायन्ति तेजोऽसि तेजो मयि धेहीत्याह तेज एवाऽऽत्मन् धत्ते ॥ [१३] ॥

(रक्षांꣳसि प्रयाजा नृतवो वै नमस्यन्तो द्वादश च) ॥ ३ ॥

स्फ्येन वेदिमुद्धन्ति रथाक्षेण वि मिमीते यूपम्मिनोति त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै यदन्तर्वेदि मिनुयाद्देवलोकमभि जयेद्यद्बहिर्वेदि मनुष्यलोकव्ँवेद्यन्तस्य सन्धौ मिनोत्युभयोर्लोकयोरभिजित्या उपरसम्मिताम्मिनुयात् पितृलोककामस्य रशनसम्मिताम्मनुष्यलोककामस्य चषालसम्मितामिन्द्रियकामस्य सर्वान्थ् समान् प्रतिष्ठाकामस्य ये त्रयो मद्ध्यमास्तान्थ् समान् पशुकामस्यैतान्वा ॥ [१४] ॥ अनु पशव उप तिष्ठन्ते पशुमानेव भवति व्यतिषजेदितरान् प्रजयैवैनम्पशुभिर् व्यतिषजति यङ्कामयेत प्रमायुकः स्यादिति गर्तमितन्तस्य मिनुयादुत्तरार्द्ध्यव्ँवर्षिष्ठमथ ह्रसीयाꣳसमेषा वै गर्तमिद्यस्यैवम्मिनोति ताजक् प्र मीयते दक्षिणार्द्ध्यव्ँवर्षिष्ठम्मिनुयाथ् सुवर्गकामस्याथ ह्रसीयाꣳसमाक्रमणमेव तथ् सेतुय्ँयजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै ॥ [१५] ॥ यदेकस्मिन्यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकाꣳ रशनान्द्वयोर् यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते यङ्कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेथ् स्त्र्येवास्य जायते यङ्कामयेत पुमानस्य जायेतेत्यान्तन्तस्य प्र

वेष्टयेत् पुमानेवास्य ॥ [१६] ॥ जायतेऽसुरा वै देवान् दक्षिणत उपानयन् तान् देवा उपशयेनैवापानुदन्त तदुपशयस्योपशयत्वँय्यँद्दक्षिणत उपशय उपशये भ्रातृव्यापनुत्त्यै सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवापशुस्तस्य यजमानः पशुर्यन्न निर्दिशेदार्तिमार्च्छेद्यजमानोऽसौ ते पशुरिति निर् दिशेद्यन्द्विष्याद्यमेव ॥ [१७] ॥ द्वेष्टि तमस्मै पशुन्निर् दिशति यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयान्न ग्राम्यान् पशून्हिनस्ति नाऽऽरण्यान् प्रजापतिः प्रजा असृजत सोऽन्नाद्येन व्यार्ध्यत स एतामेकादशिनीमपश्यत् तया वै सोऽन्नाद्यमवारुन्ध यद्दश यूपा भवन्ति दशाक्षरा विराडन्नव्विँराड् विराजैवान्नाद्यमव रुन्धे ॥ [१८] ॥ य एकादशः स्तन एवास्यै स दुह एवैनान्तेन वज्रो वा एषा सम्मीयते यदेकादशिनी सेश्वरा पुरस्तात् प्रत्यञ्चँय्यँज्ञꣳ सम्मर्दितोर् यत् पात्नीवतम्मिनोति यज्ञस्य प्रत्युत्तब्ध्यै सयत्वाय ॥ [१९] ॥

(वै समष्ट्यै पुमानेवास्य यमेव रुन्धे त्रिꣳशच्च) ॥ ४ ॥

प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एतामेकादशिनीमपश्यत् तया वै स आयुरिन्द्रियव्वीँर्यमात्मन्नधत्त प्रजा इव खलु वा एष सृजते यो यजते स एतर्हि रिरिचान इव यदेषैकादशिनी भवत्यायुरेव तयेन्द्रियव्वीँर्यँय्यजमान आत्मन् धत्ते प्रैवाऽऽग्नेयेन वापयति मिथुनꣳ सारस्वत्या करोति रेतः ॥ [२०] ॥ सौम्येन दधाति प्र जनयति पौष्णेन बार्हस्पत्यो भवति ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैवास्मै प्रजाः प्र जनयति वैश्वदेवो भवति वैश्वदेव्यो वै प्रजाः प्रजा एवास्मै प्र जनयतीन्द्रियमेवैन्द्रेणाव रुन्धे विशम्मारुतेनौजो बलमैन्द्राग्नेन प्रसवाय सावित्रो निर्वरुणत्वाय वारुणो मद्ध्यत ऐन्द्रमा लभते मद्ध्यत एवेन्द्रियँय्यजमाने दधाति ॥ [२१] ॥ पुरस्तादैन्द्रस्य वैश्वदेवमा लभते वैश्वदेवव्वाँ अन्नमन्नमेव पुरस्ताद्धत्ते तस्मात् पुरस्तादन्नमद्यत ऐन्द्रमालभ्य मारुतमा लभते विड् वै मरुतो विशमेवास्मा अनु बद्ध्नाति यदि कामयेत योऽवगतः सोऽप रुद्ध्यतांय्योँऽपरुद्धः सोऽव गच्छत्वित्यैन्द्रस्य लोके वारुणमा लभेत वारुणस्य लोक ऐन्द्र ॥ [२२] ॥ यँय्य एवावगतः सोऽप रुद्ध्यते योऽपरुद्धः सोऽव गच्छति यदि कामयेत प्रजा मुह्येयुरिति पशून् व्यतिषजेत् प्रजा एव मोहयति यदभिवाहतोऽपाव्वाँरुणमालभेत प्रजा वरुणो गृह्णीयाद् दक्षिणत उदञ्चमा लभतेऽपवाहतोऽपाम्प्रजानामवरुणग्राहाय ॥ [२३] ॥

(रेतो यजमाने दधाति लोक ऐन्द्रꣳ सप्तत्रिꣳशच्च) ॥ ५ ॥

इन्द्रः पत्निया मनुमयाजयत् ताम्पर्यग्निकृतामुदसृजत् तया मनुरादर्ध्नोद्यत् पर्यग्निकृतं पात्नीवतमुथ्सृजति यामेव मनुरृद्धिमादर्ध्नोत् तामेव यजमान ऋद्ध्नोति यज्ञस्य वा अप्रतिष्ठिताद्यज्ञः परा भवति यज्ञम्पराभवन्तय्यँजमानोऽनु परा भवति यदाज्येन पात्नीवतꣳ सꣳस्थापयति यज्ञस्य प्रतिष्ठित्यै यज्ञम्प्रतितिष्ठन्तय्यँजमानोऽनु प्रति तिष्ठतीष्टव्वँपया ॥ [२४] ॥ भवत्यनिष्टव्वँशयाऽथ पात्नीवतेन प्र चरति तीर्थ एव प्र चरत्यथो एतर्ह्येवास्य यामस्त्वाष्ट्रो भवति त्वष्टा वै रेतसः सिक्तस्य रूपाणि वि करोति तमेव वृषाणम्पत्नीष्वपि सृजति सोऽस्मै रूपाणि वि करोति ॥ [२५] ॥

(वपया षड्विꣳशच्च) ॥ ६ ॥

घ्नन्ति वा एतथ् सोमय्यँदभिषुण्वन्ति यथ् सौम्यो भवति यथा मृतायानुस्तरणीङ्घ्नन्ति तादृगेव तद् यदुत्तरार्द्धे वा मद्ध्ये वा जुहुयाद्देवताभ्यः समदन्दद्ध्याद्दक्षिणार्द्धे जुहोत्येषा वै पितृणान्दिख् स्वायामेव दिशि पितृन् निरवदयत उद्गातृभ्यो हरन्ति सामदेवत्यो वै सौम्यो यदेव साम्नः छंबट्कुर्वन्ति तस्यैव स शान्तिरवे ॥ [२६] ॥ क्षन्ते पवित्रव्वैँ सौम्य आत्मानमेव पवयन्ते य आत्मानन्न परिपश्येदितासुः स्यादभिदर्दिं कृत्वाऽवेक्षेत तस्मिन्ह्यात्मानम्परिपश्यत्यथो आत्मानमेव पवयते यो गतमनाः स्याथ् सोऽवेक्षेत यन्मे मनः परागतय्यँद्वा मे अपरागतम्। राज्ञा सोमेन तद्वयमस्मासु धारयामसीति मन एवात्मन् दाधार ॥ [२७] ॥ न गतमना भवत्यप वै तृतीयसवने यज्ञः क्रामतीजानादनीजानमभ्याग्नावैष्णव्यर्चा घृतस्य यजत्यग्निः सर्वा देवता विष्णुर् यज्ञो देवताश्चैव यज्ञञ्च दाधारोपाꣳशु यजति मिथुनत्वाय ब्रह्मवादिनो वदन्ति मित्रो यज्ञस्य स्विष्टय्यँुवते वरुणो दुरिष्टङ्क तर्हि यज्ञः क्व यजमानो भवतीति यन्मैत्रावरुणीव्वँशामालभते मित्रेणैव ॥ [२८] ॥ यज्ञस्य स्विष्टꣳ शमयति वरुणेन दुरिष्टन्नाऽऽर्तिमार्च्छति यजमानो यथा वै लाङ्गलेनोर्वराम्प्रभिन्दन्तवमृक्साम्मे यज्ञम्प्र भिन्तो यन्मैत्रावरुणीव्वँशामालभते यज्ञायैव

प्रभिन्नाय मत्यमन्ववास्यति शान्त्यै यातयामानि वा एतस्य छन्दाꣳसि य ईजानः छन्दसामेष रसो यद्वशा यन्मैत्रावरुणीँव्वशामालभते छन्दाꣳस्येव पुनरा प्रीणात्य यातयामत्वायाथो छन्द-स्स्वव रसन्दधाति ॥ [२९] ॥

(अवं दाधार मित्रेणैव प्रीणाति षट्) ॥ ७ ॥

---

देवा वा इन्द्रियँव्वीर्यं(१) व्यभजन्त ततो यदत्यशिष्यत तदतिग्राह्या अभवन् तदतिग्राह्या-णामतिग्राह्यत्वयँय्यदतिग्राह्या गृह्यन्त इन्द्रियमेव तद्वीर्यँय्यजमान आत्मन् धत्ते तेज आग्नेयेने-न्द्रियमैन्द्रेण ब्रह्मवर्चसꣳ सौर्येणोपस्तंभनँव्वा एतद्यज्ञस्य यदतिग्राह्याश्चक्रे पृष्ठानि यत् पृष्ठ्ये न गृह्णीयात् प्राञ्चँय्यज्ञम्पृष्ठानि सꣳ शृणीयुर् यदुक्थ्ये ॥ [३०] ॥ गृह्णीयात् प्रत्यञ्चँय्यज्ञम-तिग्राह्याः सꣳ शृणीयुर् विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सवीर्यत्वाय प्रजापतिर् देवेभ्यो यज्ञान् व्यादिशथ् स प्रियास्तनूरप न्यधत्त तदतिग्राह्या अभवन् वितनुस्तस्य यज्ञ इत्याहुर् यस्यातिग्राह्या न गृह्यन्त इत्यप्यग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वाय देवता वै सर्वाः सदृशी-रासन् ता न व्यावृतमगच्छन् ते देवा ॥ [३१] ॥ एत एतान् ग्रहानपश्यन् तानगृह्णताऽऽग्नेय मग्निरैन्द्रमिन्द्रः सौर्यꣳ सूर्यस्ततो वै तेऽन्याभिर्देवताभिर्व्यावृतमगच्छन्यस्यैवँव्विदुष एते ग्रहा गृह्यन्ते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छतीमे लोका ज्योतिष्मन्तः समावद्वीर्याः कार्या इत्याहुराग्नेयेनास्मिँल्लोके ज्योतिर् धत्त ऐन्द्रेणान्तरिक्ष इन्द्रवायू हि सयुजौ सौर्येणामुष्मिँ-ल्लोके ॥ [३२] ॥ ज्योतिर् धत्ते ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति समावद्वीर्यानेनान् कुरुत एतान्वै ग्रहान् बंबाविश्ववयसाववित्तान्ताभ्यामिमे लोकाः पराञ्चश्चार्वाञ्चश्च प्राभुर् यस्यैवँव्विदुष एते ग्रहा गृह्यन्ते प्रास्मा इमे लोकाः पराञ्चश्चार्वाञ्चश्च भान्ति ॥ [३३] ॥

(उक्थ्येदेवा अमुष्मिँल्लोकेकान्नचत्वारिꣳशच्च) ॥ ८ ॥

---

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा अदाभ्ये छन्दाꣳसि सवनानि समस्थापयन् ततो देवा अभवन् पराऽसुरा यस्यैवँव्विदुषोऽदाभ्यो गृह्यते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति

यद्दै देवा असुरानदाभ्ये नादभ्नुवन् तददाभ्यस्यादाभ्यत्वय्यँ एवव्वेँद दभ्नोत्येव भ्रातृव्यन्नैनम्भ्रातृव्यो दभ्नोत्ये ॥ [३४] ॥ षा वै प्रजापतेरतिमोक्षिणी नाम तनूर्यददाभ्य उपनद्धस्य गृह्णात्यतिमुक्त्या अति पाप्मानम्भ्रातृव्यम्मुच्यते य एवव्वेँद घ्नन्ति वा एतथ् सोमय्यँदभिषुण्वन्ति सोमे हन्यमाने यज्ञो हन्यते यज्ञे यजमानो ब्रह्मवादिनो वदन्ति किन्तद्यज्ञे यजमानः कुरुते येन जीवन्थ् सुवर्गंल्लोँकमेतीति जीवग्रहो वा एष यददाभ्योऽनभिषुतस्य गृह्णाति जीवन्तमेवैनꣳ सुवर्गंल्लोँकङ्गमयति वि वा एतद्यज्ञञ्छिन्दन्ति यददाभ्ये सꣳस्थापयन्त्यꣳशूनपि सृजति यज्ञस्य सन्तत्यै ॥ [३५] ॥

(दभ्नोत्य नभिषुतस्य गृह्णात्ये कान्नविꣳशतिश्च) ॥ ९ ॥

देवा वै प्रबाहुग्ग्रहानगृह्णत स एतम्प्रजापतिरꣳशुमपश्यत् तमगृह्णीत तेन वै स आर्ध्नोद्यस्यैवव्विँदुषोऽꣳशुर्गृह्यत ऋध्नोत्येव सकृदभिषुतस्य गृह्णाति सकृद्धि स तेनाऽऽर्ध्नोन्मनसा गृह्णाति मन इव हि प्रजापतिः प्रजापतेराप्त्या औदुंबरेण गृह्णात्यूर्वा उदुंबर ऊर्जमेवाव रुन्धे चतुःस्रक्ति भवति दिक्ष्वे ॥ [३६] ॥ व प्रति तिष्ठति यो वा अꣳशोरायतनव्वेँदाऽऽयतनवान् भवति वामदेव्यमिति साम तद्वा अस्याऽऽयतनम्मनसा गायमानो गृह्णात्यायतनवानेव भवति यदध्वर्युरꣳशुङ्गृह्णन् नार्धयेदुभाभ्यान्नर्ध्येताध्वर्यवे च यजमानाय च यदर्धयेदुभाभ्यामृध्येतानवानङ्गृह्णाति सैवास्यर्धिर्हिरण्यमभि व्यनित्य मृतव्वैँ हिरण्यमायुः प्राण आयुषैवामृतमभि धिनोति शतमानम्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति ॥ [३७] ॥

(दिक्ष्वे निति विꣳशतिश्च) ॥ १० ॥

प्रजापतिर् देवेभ्यो यज्ञान् व्यादिशथ् स रिरिचानोऽमन्यत स यज्ञानाꣳ षोडशधेन्द्रियव्वीँर्यमात्मानमभि समक्खिदत् तथ् षोडश्यभवन्न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशꣳ स्तोत्रꣳ षोडशꣳ शस्त्रन्तेन षोडशी तथ् षोडशिनः षोडशित्वय्यँथ् षोडशी गृह्यत इन्द्रियमेव तद्वीर्यय्यँजमान आत्मन् धत्ते देवेभ्यो वै सुवर्गो लोको ॥ [३८] ॥ न प्राभवत् त एतꣳ षोडशिनमपश्यन्

तमगृह्णत ततो वै तेभ्यः सुवर्गो लोकः प्राभवद्यथ् षोडशी गृह्यते सुवर्गस्य लोकस्याभिजित्या इन्द्रो वै देवानामानुजावर आसीथ् स प्रजापतिमुपाधावत् तस्मा एतꣳ षोडशिनम्प्रायच्छत् तम- गृह्णीत ततो वै सोऽग्रं देवतानाम्पर्यैद्यस्यैवव्विँदुषः षोडशी गृह्यते ॥ [३९] ॥ ऽग्रमेव समाना- नाम्पर्येति प्रातस्सवने गृह्णाति वज्रो वै षोडशी वज्रः प्रातस्सवनꣳ स्वादेवैनय्योँनेर् निर् गृह्णाति सवनेसवनेऽभि गृह्णाति सवनाथ्सवनादेवैनम्प्र जनयति तृतीयसवने पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी पशवस्तृतीयसवनव्वँज्रेणैवास्मै तृतीयसवनात् पशूनव रुन्धे नोक्थ्ये गृह्णीयात् प्रजा वै पशव उक्थानि यदुक्थ्ये ॥ [४०] ॥ गृह्णीयात् प्रजाम्पशूनस्य निर् दहेदतिरात्रे पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी वज्रेणैवास्मै पशूनवरुद्ध्य रात्रियोपरिष्टाच्छमयत्यप्यग्निष्टोमे राजन्यस्य गृह्णीयाद्व्यावृत्कामो हि राजन्यो यजते साह्न एवास्मै वज्रङ्गृह्णाति स एनव्वँज्रो भूत्या इन्धे निर् वा दहत्येकविꣳशꣳ स्तोत्रम्भवति प्रतिष्ठित्यै हरिवच्छस्यत इन्द्रस्य प्रियन्धामो ॥ [४१] ॥ पाप्नोति कनीयाꣳसि वै देवेषु छन्दाꣳस्यासन् ज्यायाꣳस्यसुरेषु ते देवाः कनीयसा छन्दसा ज्यायः छन्दोऽभि व्यशꣳसन् ततो वै तेऽसुराणाल्लोकमवृञ्जत यत् कनीयसा छन्दसा ज्यायः छन्दोऽभि विशꣳसति भ्रातृव्यस्यैव तल्लोकव्वृँङ्क्ते षडख्षराण्यति रेचयन्ति षड् वा ऋतव ऋतूनेव प्रीणाति चत्वारि पूर्वाण्यव कल्पयन्ति ॥ [४२] ॥ चतुष्पद एव पशूनव रुन्धे द्वे उत्तरे द्विपद एवाव रुन्धेऽनुष्टुभमभि सम्पादयन्ति वाग्वा अनुष्टुप् तस्मात् प्राणानाव्वाँगुत्तमा समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोत्येतस्मिन् वै लोक इन्द्रो वृत्रमहन्थ् साख्षादेव वज्रम्भ्रातृव्याय प्र हरत्यरुणपिशङ्गोऽश्वो दख्षिणैतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥ [४३] ॥

(लोको विदुषः षोडशी गृह्यते यदुक्थ्ये धाम कल्पयन्ति सप्तचत्वारिꣳशच्च) ॥ ११ ॥

## समाप्ति कोर्वैः

(सुवर्गाय यद् दाख्षिणानि समिष्ट यजूꣳष्यवभृथ यजूꣳषि स्फ्येन प्रजापतिरेकादशिनी मिन्द्रः पत्निया घ्नन्ति देवा वा इन्द्रियव्वीँर्यं देवा वा अदाभ्ये देवा वै प्रबाहुक् प्रजापतिर्देवेभ्यः स रिरिचानः षोडशधैकादश)

(सुवर्गाय यजति प्रजाः सौम्येन गृह्णीयात् प्रत्यञ्चं गृह्णीयात् प्रजाम्पशून् त्रिचत्वारिꣳशत्)

(सुवर्गाय वज्रस्य रूपꣳ समृद्ध्यै)

(प्राचीनवꣳशं य च्चात्वालं यज्ञेने न्द्रः सुवर्गाय षट्)

॥ हरिः ॐ ॥

## षष्ठकाण्डे षष्ठः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ४३ |

ॐ